नलोपाख्यानम्

27

बृहदश्व उवाच।

अथ तां व्युषितो रात्रिं नलो राजा स्वलंकृतः।

वैदर्भ्या सहितः काल्यं ददर्श वसुधाधिपम्॥ ३-७६-१॥

ततो ऽभिवादयामास प्रयतः श्वशुरं नलः।

तस्यानु दमयन्ती च ववन्दे पितरं शुभा॥ ३-७६-२॥

तं भीमः प्रतिजग्राह पुत्रवत्परया मुदा।

यथार्हं पूजयित्वा तु समाश्वासयत प्रभुः।

नलेन सहितां तत्र दमयन्तीं पतिव्रताम्॥ ३-७६-३॥

तामर्हणां नलो राजा प्रतिगृह्य यथाविधि।

परिचर्यां स्वकां तस्मै यथावत्प्रत्यवेदयत्॥ ३-७६-४॥

ततो बभूव नगरे सुमहान्हर्षनिस्वनः।

जनस्य संप्रहृष्टस्य नलं दृष्ट्वा तथागतम्॥ ३-७६-५॥

अशोभयच्च नगरं पताकाध्वजमालिनम्।

सिक्तसंमृष्टपुष्पाढ्या राजमार्गाः कृतास्तदा॥ ३-७६-६॥

द्वारि द्वारि च पौराणां पुष्पभङ्गः प्रकल्पितः।

अर्चितानि च सर्वाणि देवतायतनानि च॥ ३-७६-७॥

ऋतुपर्णो ऽपि शुश्राव बाहुकच्छद्मिनं नलम्।

दमयन्त्या समायुक्तं जहृषे च नराधिपः॥ ३-७६-८॥

तमानाय्य नलो राजा क्षमयामास पार्थिवम्।

स च तं क्षमयामास हेतुभिर्बुद्धिसंमतः॥ ३-७६-९॥

स सत्कृतो महीपालो नैषधं विस्मयान्वितः।

दिष्ट्या समेतो दारैः स्वैर्भवानित्यभ्यनन्दत॥ ३-७६-१०॥

कच्चित्तु नापराधं ते कृतवानस्मि नैषध।

अज्ञातवासं वसतो मद्गृहे निषधाधिप॥ ३-७६-११॥

यदि वा बुद्धिपूर्वाणि यद्यबुद्धानि कानिचित्।

मया कृतान्यकार्याणि तानि मे क्षन्तुमर्हसि॥ ३-७६-१२॥

नल उवाच।

न मे ऽपराधं कृतवांस्त्वं स्वल्पमपि पार्थिव।

कृते ऽपि च न मे कोपः क्षन्तव्यं हि मया तव॥ ३-७६-१३॥
पूर्वं ह्यसि सखा मे ऽसि संबन्धी च नराधिप।
अत ऊर्ध्वं तु भूयस्त्वं प्रीतिमाहर्तुमर्हसि॥ ३-७६-१४॥
सर्वकामैः सुविहितः सुखमस्म्युषितस्त्वयि।
न तथा स्वगृहे राजन्यथा तव गृहे सदा॥ ३-७६-१५॥
इदं चैव हयज्ञानं त्वदीयं मयि तिष्ठति।
तदुपाकर्तुमिच्छामि मन्यसे यदि पार्थिव॥ ३-७६-१६॥

बृहदश्व उवाच।

एवमुक्त्वा ददौ विद्यामृतुपर्णाय नैषधः।
स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा॥ ३-७६-१७॥
ततो गृह्याश्वहृदयं तदा भाङ्गस्वरिर्नृपः।
सूतमन्यमुपादाय ययौ स्वपुरमेव हि॥ ३-७६-१८॥
ऋतुपर्णो प्रतिगते नलो राजा विशां पते।
नगरे कुण्डिने कालं नातिदीर्घमिवावसत्॥ ३-७६-१९॥